

## भव्येन सञ्जातं गणतन्त्रदिवसस्यायोजनम्

"गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे" एवम्भूतो विद्यते देशः अस्माकं यत्र देशस्य गणतन्त्रार्थं नैके भारतमातुः सुताः स्वप्राणान् त्यक्तवन्तः। भारतस्य प्रथमगणतन्त्रदिवसः 26 जनवरी 1950 तमे महता हर्षोल्लासेन समायोजितः आसीत्, तत आरभ्य प्रतिवर्षं गणतन्त्रदिवसस्यायोजनं सर्वासु शैक्षणिकसंस्थासु तदितरसंस्थासु च क्रियते। अस्मिन् वर्षे भारतस्य 73 तमोऽयं दिवस आसीत्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेणापि महतोल्लासेनायं दिवसः परिपालितः। परिसरस्य निदेशदेशकवर्येण प्रो.विजयपालशास्त्रिणा राष्ट्रीयध्वजोत्तलनं विहितम्। तेन भारतस्य वीरपुत्रैः कृतस्य प्राणत्यागस्य स्मरणं कृत्वा माल्यार्पणं तेषां प्रतिमासु कृतम्। तदनन्तरं स सर्वान् प्राध्यापकान् छात्रान् चोद्बोधितवान्। भारतदेशस्य रक्षा अस्माकं परमं कर्त्तव्यं विद्यते, अस्माकं पूर्वजैः महता कष्टेन वैदेशिकानां पाशात् विमुक्तोऽयं देशः। अतः सर्वतो भावेन अस्य सुरक्षा अस्माकं धर्मोऽपि भवति। अस्मिन् अवसरे डा.सच्चिदानन्दस्नेहीमहोदयेन भारतसंविधानस्य प्रस्तावना पठिता, तथा च सर्वैः तस्या पालनं करणीयमित्युक्तम्। डा.अनिलकुमारेण देशस्य रक्षार्थं प्रेरणाप्रदं काव्यं तत्र प्रस्तुतम्। अन्यैः प्राध्यापकैरपि अस्मिन् अवसरे स्वविचाराः प्रस्तुताः। कार्यक्रमस्य सञ्चालनं शारीरिकशिक्षासहायकनिदेशकेन डॉ.गौतमचौधरिणा कृतमासीत्।